श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते दशमस्कन्धे

# ॥ श्री भूमिदेवी स्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री भूमिदेवी स्तुतिः ॥

भूमिरुवाच

नमस्ते देवदेवेश शङ्खचक्रगदाधर।
भक्तेच्छोपात्तरूपाय परमात्मन् नमोऽस्तु ते ॥ 25 ॥

नमः पङ्कजनाभाय नमः पङ्कजमालिने।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ 26 ॥

नमो भगवते तुभ्यं वासुदेवाय विष्णवे।
पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥ 27 ॥

अजाय जनयित्रेऽस्य ब्रह्मणेऽनन्तशक्तये।
परावरात्मन् भूतात्मन् परमात्मन् नमोऽस्तु ते ॥ 28 ॥

त्वं वै सिसृक्षू रज उत्कटं प्रभो
    तमो निरोधाय बिभर्ष्यसंवृतः।
स्थानाय सत्त्वं जगतो जगत्पते
    कालः प्रधानं पुरुषो भवान् परः ॥ 29 ॥

अहं पयो ज्योतिरथानिलो नभो
    मात्राणि देवा मन इन्द्रियाणि।
कर्ता महानित्यखिलं चराचरं
    त्वय्यद्वितीये भगवन्नयं भ्रमः ॥ 30 ॥

तस्यात्मजोऽयं तव पादपङ्कजं
    भीतः प्रपन्नार्तिहरोपसादितः।

तत् पालयैनं कुरु हस्तपङ्कजं
शिरस्यमुष्याखिलकल्मषापहम् ॥ **31** ॥

॥ इति श्री भूमिदेवी स्तुतिः समाप्ता ॥